Shri Raghunatha Temple MSS. Library,
JAMMU

No. १००५-ध

Title सनत्कुमार तन्त्रे त्रैलोक्यमंगल-नामकवचम्

Author

Extent ३

Age

Subject तन्त्रम् . सम्पूर्णम्

नं० १००५-घ

सनत्कुमारतंत्रे त्रैलोक्यमङ्गलंनामकवचम् (तन्त्रम्)

पत्राणि ३ (सम्पूर्णम्)

नं० १००५-घ ३

॥श्रीगुरुभ्योनमः॥ ॥पुलस्त्यउवाच॥भगवन्सर्वधर्मज्ञकवचंयत्प्रकाशितं
त्रैलोक्यमंगलंनामकृपयाकथयप्रभो॥१॥ ॥सनत्कुमारउवाच॥शृणुविप्रेंद्र
वक्ष्यामिकवचंपरमाद्भुतं।नारायणेनकथितंकृपयाब्रह्मणेपुरा॥२॥ब्रह्मणा
कथितंमह्यंतवस्नेहाद्वदामितत्।अतिगुह्यतरंतत्त्वंब्रह्ममंत्रौघविग्रहं॥३॥य
द्धृत्वापठनाद्ब्रह्मासृष्टिंवितनुतेध्रुवं।यद्धृत्वापठनात्पातिमहालक्ष्मीर्जग
त्त्रयं॥४॥पठनाद्धारणाच्छंभुःसंहर्त्तासर्वतत्त्ववित्।त्रैलोक्यजननीदुर्गामहि
षादिमहासुरान्॥५॥वरदृप्तान्जघानैवपठनाद्धारणाद्यतः।एवमिंद्रादयःस
र्वेसर्वैश्वर्यमवाप्नुयुः॥६॥शिष्यायविष्णुभक्तायसाधकायप्रकाशयेत्।शठायप
रशिष्यायदत्वामृत्युमवाप्नुयात्॥७॥त्रैलोक्यमंगलस्यास्यकवचस्यप्रजापतिः॥
ऋषिश्छंदश्चगायत्रीदेवोनारायणःस्वयं॥८॥धर्मार्थकाममोक्षेषुविनियोगःप्रकी
र्त्तितः।ॐप्रणवोमेशिरःपातुनमोनारायणायच॥९॥भालंमेनेत्रयुग्ममष्टार्णो

भुक्तिमुक्तिदः। क्लीं पायाच्छ्रोत्रयुग्मं तु एकाक्षरः सर्वमोहनः॥९॥ क्लीं कृष्णा
य सदा घ्राणं गोविंदायेति जिह्विकां॥ गोपीजनवल्लभाय पातु स्वाहाननं मम॥
१०॥ अष्टादशाक्षरो मंत्रः कंठं पातु दशाक्षरः। गोपीजनपदं वल्लभाय स्वाहा
भुजद्वयं॥११॥ क्लीं ग्लौं क्लीं श्यामलांगाय नमः स्कंधौ दशाक्षरः। क्लीं कृष्णः क्लीं
करौ पायात् क्लीं कृष्णाय गलं मम॥१२॥ हृदयं भुवनेशाय क्लीं कृष्णाय स्तनौ म
म॥ गोपालायाग्निजायांतः कुक्षियुग्मं सदावतु॥१३॥ क्लीं कृष्णाय सदा पा
तु पार्श्वयुग्ममनुत्तमः॥ कृष्णगोविंदकौ पातां स्मराद्यंगेयुतौ मनुः॥१४॥
अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरो वतु॥ पृष्ठं क्लीं कृष्णकं काजं क्लीं कृष्णाय
द्विगंतकः॥१५॥ सक्थिनी सततं पातु श्रीं ह्रीं क्लीं कृष्णठद्वयं॥ ऊरू सप्ताक्षरः पा
यात् त्रयोदशाक्षरो वतु॥१६॥ ह्रीं श्रीं क्लीं पदतो गोपीजनवल्लभाय पदं॥ ततः १
स्वाहे पायुं वै क्लीं ह्रीं श्रीं षोडशार्णकः॥१७॥ जानुनी च सदा पातु ह्रीं श्रीं क्लीं

चुर्दशाक्षरः॥त्रयोदशाक्षरःपातुजंघेचक्रायुधः॥१८॥अष्टादशाक्षरो
ह्रींश्रींपूर्वकोविंशवर्णकः॥सर्वांगमेसदापातुद्वारकानायकोबली॥१९॥
नमोभगवतेपश्चात्वासुदेवायततःपरं॥ताराद्योद्वादशार्णोयंप्राच्यांमांसर्व
दावतु॥२०॥ह्रींश्रींक्लींदशवर्णस्तुक्लींह्रींश्रींषोडशाक्षरः॥गदाद्युक्रायुधोविष्णु
र्मामग्नेर्दिशिरक्षतु॥२१॥ह्रींश्रींदशाक्षरोमंत्रोदक्षिणेमांसदावतु॥तारोनमो
भगवतेरुक्मिणीवल्लभायच॥२२॥स्वाहेतिषोडशार्णोयंनैर्ऋत्यांदिशिरक्ष
तु॥क्लींहृषीकेशपदांतायनमोमांवारुणेवतु॥२३॥अष्टादशार्णकोमंत्रो
वायव्येमांसदावतु॥श्रीमायाकामरुक्मायगोविंदायद्विगोमनुः॥२४॥द्वाद
शार्णात्मकोविष्णुरुत्तरेमांसदावतु॥वाग्भवंकामरुक्मायह्रींगोविंदायततः
परं॥२५॥श्रीगोपीजनवल्लभायस्वाहाहस्तौततःपरं॥द्वाविंशत्यक्षरोमंत्रो
ईशान्येचसदावतु॥२६॥ [illegible] योनित्यंन्यासंकरोतितं॥नमामि

३ मो

देवकीपुत्रंनत्यराजानमच्युतं॥२७॥ द्वात्रिंशदक्षरोमंत्रोध्येयोमांसर्वदा
२ वत्त॥ कामदेवायविद्महे पुष्पबाणायधीमहि॥ तन्नोनंगः प्रचोदयात्॥
गायत्रीकामदेवस्यसेर्षोपात्तचोर्द्धतः॥ इतितेकथितंविप्रब्रह्ममंत्रौघविग्र
हं॥२८॥ त्रैलोक्यमंगलंनामकवचंब्रह्मरूपकं॥ ब्रह्मेशप्रमुखाधीशनारा
ल्कु यणमुखाच्छ्रुतं॥ तवस्नेहान्मयाख्यातंप्रवक्तव्यंनकस्यचित्॥ गुरुंप्रण
म्यविधिवत्कवचंप्रपठेत्ततः॥ सकृद्द्वित्रिर्यथाज्ञानंसोपिसर्वतपोमयः॥
मंत्रेषुसकलेष्वेवदेशिकोनात्रसंशयः॥३१॥ शतमष्टोत्तरंचास्यपुरश्चर्यावि
धिःस्मृतः॥ हवनादीन्दशांशेनकृत्वातत्साधयेद्ध्रुवं॥३२॥ यदिस्यात्सिद्धक
वचोविष्णुरेवभवेत्स्वयं॥ स्पर्द्धमित्युच्यसततंलक्ष्मीर्वाणीवसेन्मुखे॥३३
पुष्पांजल्यष्टकंदत्वामूलेनैवपठेत्सकृत्॥ दशवर्षसहस्राणिपूजायाःफ ३
लमाप्नुयात्॥ भूर्जेविलिख्यगुटिकांस्वर्णस्थांधारयेद्यदि॥३४॥ कंठेवा

दक्षिणे वा होसोपि विष्णुर्नसंशयः॥ अश्वमेधसहस्राणि वाजपेयशतानि च
३६॥ महादानानि यान्येव प्रादक्षिण्यं नुवस्तथा॥ कलां नार्हंति तान्येव सकृदु
च्चारणात्ततः॥३७॥ कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः॥ पुत्रपौत्रसमायु
क्तस्त्रैलोक्ये विजयी भवेत्॥३८॥ इदं कवचमज्ञात्वा भजेद्यः पुरुषोत्तमं॥ शत
लक्षप्रजप्तोपि न मंत्रं सिद्धिदायकः॥३९॥ ॥इति सनत्कुमारतंत्रे त्रैलोक्यमं
गलं नाम कवचं॥ संपूर्णं॥ ॥श्रीरस्तु॥ ॥श्रीगोपीजनवल्लभो जयतु॥ ॥

3